भारतशासन-नियन्त्रीं लोकसभाम् उद्दिश्य प्रेष्यतां सपदि पत्रप्रस्तावादिसाहस्री । ज्ञाप्यतां सर्वं कृतम् इदं 'शारदा कारेभ्यः । सांप्रतिके गणतन्त्रे गणराज्ये श्रीशं जनतात्मानं विना कम् अन्यम् उद्दिश्य प्रार्थना इयं विधेया । भारतस्य भारताख्यां सत्यापयितुम् अयम् एव साधीयान्, फलेग्राही मार्गः इति द्रढीयसा विश्वासेन प्रार्थनायाम् अस्यां नः प्रवृत्तिः । युक्तम् अयुक्तं वा साधयितुं भारतीयप्रजा एव सर्वाधिकारिणी । अत एव प्रार्थनाम् इमां पुरस्कृत्य——

न म: श्री ज न ता त्म ने ।

अत्र प्रेष्यन्तां चपलाकान्त-पुरस्कार-पत्राणि——

प्रस्तावकः चपलाकान्तः भट्टाचार्यः
१६, फेरोजशहा मार्गः न. दिल्ली. १ (दूरवाणी ४६४३९)
२४ ए, हेमेन्द्रसेन. मार्गः कलकत्ता-६ (दूरवाणी ५५-३४९८)

लोकसभापतिः एन्. संजीव रेड्डी
मोतीलाल नेहरु-मार्गः न. दिल्ली ११ (६१९५१५-३१८२४)

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई

सौर १६ आषाढ १८८९

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् ८ अङ्कः १७

वार्षिकमूल्यम् रू. ५ * अस्य अङ्कद्वयस्य रू. ०–२५

स्वतन्त्र-भारतेतिहासे प्रथमः संस्कृतज्ञः शिक्षामन्त्री

भारतवर्षस्य नूतनः शिक्षा-मन्त्री डॉ. त्रिगुण सेन महोदयः संस्कृतानुरागी संस्कृतनिष्ठः संस्कृत-पत्रलेखन-प्रियः च। सर्वैः संस्कृतनिष्ठैः नूतनेन शिक्षामन्त्रिणा सह अवश्यमेव संस्कृत-माध्यमेन संपर्कः साधनीयः। 'शारदा'कारैः प्राप्तं संस्कृतपत्रोत्तरम् अत एव प्रकाश्यते अत्र सर्वेषां ज्ञानार्थम्।

— संपादकः शारदा

(राष्ट्रमुद्रा)

सत्यमेव जयते

शिक्षामन्त्री, भारत
नई दिल्ली
२६ जून, १९६७
क्र. १४–६७–६४

श्री वसन्त अ. गाडगीळ
संपादकः 'शारदा'
४२५ सदाशिव पेठ,
खजिना महाल, पुणें २

महोदय,

भवदीयं पत्रं प्राप्तम्। धन्यवादाः। अवश्यमेव भवत्प्रस्तावितान् विषयान् विचारयिष्यामः। शुभकामनाभिः सह।

भवदीयः
(स्वाक्षरी)
त्रिगुण सेन

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

मातृदेवो भव ।

पुण्यपत्तनस्थैः 'शारदा'-भक्तोत्तमैः प्रज्ञाचक्षुभिः **पं. होशिङ्ग दीक्षित** नारायणशास्त्रिभिः प्रकाशित-निमन्त्रण-पत्रिकाम् अनुसृत्य ११ जून ६७, रविवासरे प्रातः सविधानं पूजिता मातृदेवता । सायं पुण्यपत्तनस्थ-विद्वन्मण्डलीसभायां सत्कृताः तैः वल्लभ-सूर्यपीठाधीश-श्रीचरणाः । मङ्गलसमये तस्मिन् प्राचार्य पं. **भागवत** वामनशास्त्रिणः, पं. **आठलेकर** श्रीपादशास्त्रिणः, पं. **धर्माधिकारी** रामचन्द्रशास्त्रिणः, पं **शेण्डये** गणेशशास्त्रिणः, श्री. गणेश उमाकान्त **थिटे**, '**शारदा**'काराः इ. नैके संस्कृतसेवकाः समुपस्थिताः ।

॥ श्रीः ॥

स्वस्ति सादरं नमो नमः ।

श्रीकुलस्वामिप्रसादेन अस्मद्गृहे मातृपूजा-विधानानुसारं **मातृचरणपूजनं** संयोजितम् । तदर्थम् अत्रभवन्तः भवन्तः समागत्य आनन्दं बहुगुणयन्तु इति प्रार्थयामहे ।

भवदीयाः

नारायण हरि दीक्षितः बालकृष्ण हरि दीक्षितः सदाशिव हरि दीक्षितः

स्थलम् — सदाशिव-वीथ्याम्, ९९० गृहक्रमाङ्कः, पुण्यपत्तनम् २.
समयः — दि. ११–६–६७ रविवासरे, सायम् ५ तः ८ पर्यन्तम् ।

सादरम् अभिनन्द्यन्ते पं. **दीक्षितशास्त्रिणः** सांप्रतिके कलितन्त्रयुगे यन्त्रप्रधाने मातृपूजोपक्रमार्थम् । सर्वे शारदोपासकाः नगरे नगरे इत्थमेव मातृपूजासमारोहान् संयोजयन्तु इति साग्रहं प्रार्थयामहे ।

— संपादकः ।

स्मर्यताम् ! स्मर्यताम् ! स्मर्यताम् !

शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् २
४२५ सदाशिव पेठ, खजिनामहाल-भवनम् पुण्यपत्तनम् २

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

जय गङ्गे ! भागीरथि !!

॥ श्रीः ॥ गङ्गा-हरिद्वारम्
ज्येष्ठ शु. ११–१८८९
(१८ जून १९६७)

आयुष्मते गिरीशाय स्वस्ति। अद्य एकादशी। ज्येष्ठस्य। अद्यतनं दिनमाहात्म्यं ते जननी जानाति। भाग्यभव्यः तव बाबा अद्य प्राप्तः हरिद्वारम्। प्रातः ३–३० वादन समये। आरामवसयानेन। मित्रोत्तमः चक्रदेवः अपि संप्राप्तः। चक्रदेवः आयुषि प्रथमम् एव हरिद्वारम् आगच्छति। परं तव तातः पञ्चमं वारम्। गतचतुर्वारम् अत्र न प्राप्ता एकादशी। अद्य तु अकल्पिता प्राप्ता। अयं विशेषः।

हरिद्वारं विष्णुक्षेत्रम्। तद् विष्णोः परमं पदम्। सदा पश्यन्ति सूरयः। विष्णुभक्ताः वैष्णवाः। भगवद्भक्ताः भागवताः। ते सर्वे (अत्र) तत्र (आ) गच्छन्ति यत्र तिष्ठामि नारद। इति वदति भक्तवत्सलः भगवान्। तदनुसारं भगवतः पदारविन्दं प्रक्षालयन्ती प्रसन्नसलिला भगवती जह्नुतनया भागीरथी हिमगिरिशिखरात् प्रस्थिता महता वेगेन हरिद्वारं प्राप्नोति। महान् अयं वेगः। शैत्यं तावद् अवर्णनीयम् एव। सर्वथा असह्यम्। वेदनाकरम्। अत्र स्नानं कष्टाय। परम् एकदा स्नाते तदेव प्रमोदाय। पुण्याय। माङ्गल्याय।

अतः एव सर्वे गङ्गाप्रवाहे स्नान्ति। बालाः, बालिकाः। तरुणाः तरुण्यः। वृद्धाः वृद्धाः। चतुराः मूर्खाः। दरिद्राः संपन्नाः। सश्रद्धाः नास्तिकाः। अत्र सर्वेषाम् एव स्नानं सुलभम्। पुण्यलाभः अदृष्टः। सः तु दूरे। परं प्रमोदः प्रत्यक्षः। प्रसन्नता सहधर्मचारिणी भवति। माङ्गल्यं मैत्रं करोति। पावित्र्यं सहैव तिष्ठति। इदं सत्यम्। अत्रैव शिवम्। नान्यत्र सुन्दरम्। सर्वे मानवाः गङ्गाम् आगच्छन्तु। तत्र स्नान्तु। सत्यं प्रत्यक्षीकुर्वन्तु। शिवम् अनुभवन्तु। सुन्दरं सुन्दरीकुर्वन्तु। ते धन्याः। ते पुण्याः। ते भाग्यवन्तः। ते दैववन्तः। ये गङ्गां पूजयन्ति। स्नान्ति। जपन्ति। सदैव स्मरन्ति। न कदापि विस्मरन्ति। युक्तम् उक्तं सुभाषितकारेण—

'गङ्गा गङ्गा'-इति यो ब्रूयात् योजनानां शतैरपि।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥

मया प्राप्तं गङ्गाभाग्यं सर्वे प्राप्नुवन्तु। सर्वे प्रसन्नाः सन्तु। सर्वे सुखिनः भवन्तु। इदमेव याचे। इदमेव प्रार्थये। जय गङ्गे ! भागीरथि !!

बाबा

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

अ. भा. सं. सा. संमेलन-महासमितौ अध्यक्षानुमत्या तात्कालिकं प्रस्ताव-त्रयम्

१ सांप्रतिके भाषासूत्रविषयक-कलकले भारतशासनेन कदाचिदपि संस्कृतं नोपेक्षणीयम्। द्विभाषासूत्रं भवतु त्रिभाषासूत्रं वा, परं तत्र संस्कृतस्य सर्वप्रथमम् अन्तर्भावः भवतु। तेनैव राष्ट्रैक्यं सुनिश्चितम् इति विश्वासेन प्रार्थयते सभेयं यद् भाषासूत्रे संस्कृतं अनिवार्यं भवतु।

प्रस्तावकः **वसन्त अ. गाडगीळ**
समर्थकः **सुरजदास स्वामी**

२ अ. भा. संस्कृत-साहित्य-संमेलनस्य पदाधिकारिणां कार्यसमितेश्च सदस्यानां नाम-निर्धारणार्थं 'डॉ. आदित्यनाथ झा' महोदयैः संमेलनाध्यक्षाभिः महामन्त्रिणीभिः सह विचार-विमर्शं कृत्वा निर्णयः उद्घोषणीयः इति प्रार्थयते सभा इयम्। एतदर्थं डॉ. झा महोदयैः श्री. मौलिचन्द्रजी शर्मा तथा डॉ. मण्डनमिश्र इत्येतैः सह सत्वरातिसत्वरं साक्षात्करणीया संमेलनाध्यक्षा, शिष्टमण्डलेन अनेन निर्णेयश्च निर्णयः इति प्रार्थयते सभा इयम्।

प्रस्तावकः **वसन्त अ. गाडगीळ**
समर्थकः **दर्याबप्रसाद शर्मा**

३ मुम्बई-नगरे प्रा. माधवाचार्याः तथा प्रा. रश्मि द्विवेदि-महोदयाः अ. भा. सं. साहित्य-संमेलनस्य नाम्नः दुरुपयोगं कृत्वा संस्कृत-समाजस्य वञ्चनां कुर्वन्ति इति अनुभूयते। सभा इयं प्रार्थयते यत् संमेलन-प्रधान-कार्यवाहैः डॉ. मण्डनमिश्रैः वञ्चकानाम् एतेषां वैधदण्डनार्थं यद् युक्तम् आवश्यकं च तद् विधिज्ञसाहाय्येन सत्वरम् आचरणीयम् इति।

प्रस्तावकः **भगवान् दत्तशास्त्री राकेशः** (कलकत्ता)
समर्थकः **पं. अमीरचन्द्रशास्त्री** (दिल्ली)

★ संस्कृताभ्यासार्थम् अवश्यं संग्राह्या ★
पं. वामन वेङ्कटेश आपटे—विरचिता
पा ठ्य व्या क र ण दी पि का
पृष्ठसंख्या १५० मूल्यम् रु. १–२५
प्राप्तिस्थानम्— 'शारदा-' कार्यालयः ४२५ सदाशिव, पुणे २

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

दिल्ली-राजधान्यां 'शारदा' - काराः

दिल्ली दि. २४ जून (शारदा–राजधानी–प्रतिनिधितः)

अखिल-भारतीय-संस्कृत-साहित्य-संमेलनस्य कार्यकारिणी, महासमितिः, स्व. लालबहाद्दुरशास्त्री-राष्ट्रीय-संस्कृत-विद्यापीठस्य शासननिकायः च इति संमेलन-विभागत्रयेण संबद्धानां समेषां सदस्यानां विशेषसभा संमेलन-कार्याध्यक्षाणां दिल्ली-राज्यपालानां **डॉ. आदित्यनाथ झा**महोदयानां साभापत्येन दिल्ली–राजभवने १७ जून ६७ शनिवासरे प्रातः १० वादनसमये सुसंपन्ना।

अस्यां सभायां संमेलन-संघटनमन्त्रित्वेन, महाराष्ट्र-शाखा-प्रधानकार्यवाहत्वेन च 'शारदा' काराः **पं. गाडगीळ वसन्तरायाः** समुपस्थिताः। तैः सह मुम्बापुरीस्थाः संस्कृतराष्ट्रभाषा-कारिणी-सभासंचालकाः **पं. लक्ष्मीकान्त चक्रदेव**-महोदयाः अपि राजधानीं प्राप्ताः। उभाभ्याम् एताभ्यां सप्ताहाभ्यन्तरे दिल्ली–निवास–काले संस्कृतप्रसारात्मकं निम्नलिखितप्रकारकं कार्यं यशस्वितां नीतम्।

शनिवासरे (१७ जून ६७) प्रातः १० वादने राजभवने संपन्नायां विशेषसभायां विविधप्रस्तावान् उद्दिश्य **शारदा**-कारैः सरल–सुबोधसंस्कृतगिरा स्वविचाराः परिचायिताः सभ्येभ्यः। (ते प्रस्तावाः स्वातन्त्र्येण अस्मिन् अङ्के प्रकाशिताः सन्ति।) सर्वेषां सदस्यानां भाषणानि हिन्दीभाषायाम् आसन्। परं स्वप्रतिज्ञानुसारं 'शारदा'-कारैः संस्कृतमाध्यमेन एव संपादितः वाग्व्यवहारः सर्वेषां संतोषाय आसीत्।

रविवासरे (१८ जून ६७) हरिद्वारं गत्वा दण्डी–आश्रमे महन्त-स्वामिश्री-सोमेश्वराश्रम-यतिश्रेष्ठाः संस्कृत-विषयक-स्वप्रवृत्तिविषये परिचायिताः।

सोमवासरे (१९ जून ६७) लोकसभासदस्याः श्री. जोशी जगन्नाथरायाः, श्री. कुण्टे नारायाः 'जन्मभूमि–प्रतिनिधिः श्री. नरभेराम सदाव्रती च साक्षात्कृताः। लोकसभाप्रेक्षागारं प्रविश्य निरीक्षितं लोकसभाकार्यम्। सायं ७ वादने स्वराष्ट्र-मन्त्रिणः ना. चह्वाण यशवन्तरायाः साक्षात्कृताः। तैश्च प्रतिश्रुतं सर्वात्मना सहकार्यं **डॉ. श्री. भा. वर्णेकर**-रचितस्य **श्रीशिवराज्योदयमहाकाव्यस्य** प्रकाशन-विषये। समारोहः अयं दिल्ली–राजधान्यां प्रायः **राष्ट्रपति**–भवने संपत्स्यते।

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

पू. पं. श्री. दा. सातवळेकराणां सत्कृतिसमारोहः नोव्हेम्बर ६७ मासे राजधान्यां संयोजितः। तत्रापि प्रतिश्रुतं साहाय्यं गृहमन्त्रिभिः।

मङ्गलवासरे (२० जून ६७) आकाशवाणीभवने नैके शारदोपासकाः (श्री. डी. पूर्णय्या, कार्यक्रमसंचालकः डॉ. बृहस्पतिः, संगीत-संयोजिका सौ. सुमति मुटाटकर इ.) साक्षात्कृताः यैः प्रतिश्रुतं सर्वात्मना सहकार्यम्।

बुधवासरे (२१ जून ६७) मध्याह्ने आकाशवाणी-सर्वाधिकारिभिः डॉ. नारायण मेनन-महोदयैः सह आकाशवाणी-संस्कृत-विषये सुविस्तरं चर्चा संपन्ना। शारदा'कारणां सूचनाः सादरं स्वीकृताः तैः।

ततः डॉ. त्रिगुणसेन-शिक्षामन्त्रिणः तथैव नभोवाणी-सूचना-प्रसारण-मन्त्रिणः श्री. के. के. शहामहोदयाः पूर्वसंकेतम् अनुसृत्य साक्षात्कृताः। उभाभ्यां प्रतिश्रुतं सहकार्यं संस्कृत-प्रसार-कार्ये।

अस्मिन्नेव दिने मध्याह्ने राजधानीं प्राप्तानां शृङ्गगिरि-पीठ-श्री-चरणानां दर्शनार्थं श्रीलक्ष्मीबाईनगरस्थं मद्र-विद्यालयं प्राप्ताः 'शारदा'काराः। विविधविषयेषु संपन्नायां चर्चायां शारदा-कारैः सुबोध-भारतीम् आश्रित्य यद् भाषितं तेन भृशं प्रसन्नाः 'श्री' चरणाः।

गुरुवासरे (२२—६—६७) प्रातः रामकृष्णपुरे श्रीशाङ्करविद्याकेन्द्रे श्रीशृङ्गगिरि-श्री-चरणानां शुभकरकमलाभ्यां संयोजिते नूत्नमूर्ति-प्रतिष्ठा-(श्री शारदाम्बा-चन्द्रमौलीश्वर-भगवत्-पूज्य-पादानाम्)कुम्भाभिषेकमहोत्सवे समुपस्थाय 'श्री-' प्रसादं स्वीकृत्य 'शारदा'कारैः मध्याह्ने साक्षात्कृताः आर्य-धर्म-सेवा-संघ कार्यवाहाः पं. जनार्दनभट्टाः, दिल्ली-मुख्य-पार्षदाः श्री. विजयकुमार मलहोत्रामहोदयाः तथा अन्ये प्रमुखाधिकारिणः।

सायं. रा. स्व. संघ-शिक्षावर्गे महापौर श्री.लाला हंसराज गुप्ता, श्री. वसन्तराव ओक, श्री. उमाकान्त (बाबाराय) आपटे, श्री.दर्याबप्रसादशर्मा प्रभृतिभिः राजधान्यां भविष्यमाणस्य पू. पं. सातवळेकरसत्कृति-समारोहस्य विषये चर्चा कृत्वा निर्णयान् कतिचन निर्णीय समाप्तता नीतं 'शारदा'कारैः राजधानीस्थं संस्कृतविषयकं स्वकार्यम्।

* * *

कृपया सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ५=००

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

धर्म - चक्र - प्रवर्तनाय !

॥ श्रीः ॥ न. दिल्ली २३ जून ६७

आयुष्मते शिरीषाय स्वस्ति

गुरुवासरे (१५ जून ६७) प्रातः जनता-एक्स्प्रेस-यानेन प्रस्थितः मुम्बापुर्यां मित्रवरं श्री. ल. म. चक्रदेवमहोदयं गृहीत्वा मध्याह्ने ३ वादने पञ्जाबमेल-यानेन निर्गत्य शुक्रवासरे रात्रौ १० वादनसमये दिल्लीं प्राप्तः। शनिवासरे (१७ जून) प्रातः १० तः ११ वादनान्तं संमेलन-महासभा सुसंपन्ना। 'शारदा' कारैः स्थापिताः सर्वे प्रस्तावाः स्वीकृताः सर्वैः ऐकमत्येन। तदनुसारं नोव्हेम्बर ६७ तृतीये सप्ताहे दिल्लीनगरे एव अग्रिमाधिवेशनं सुनिश्चितम्। अग्रिमवर्षे (१९६८) संमेलनं महाराष्ट्र-प्रदेशे निमन्त्रितम्। तदर्थम् अस्माभिः सर्वैः भृशं प्रयतनीयम्।

रात्रौ ८ वादने प्रस्थितः भानौ (१८ जून) प्रातः ३-३० हरिद्वारं प्राप्तः। हरिद्वारे स्नात्वा मध्याह्ने हृषीकेशं प्राप्तः। तत्र पुनः स्नानम्। भोजनम्। विश्रामः। गङ्गापरिसरे निवास-सौख्यम्। रात्रौ पुनः रेल-यानेन प्रस्थाय सोमे (१९ जून) प्रातः प्राप्तः दिल्लीम्।

सोमवासरे लोकसभासदस्यैः श्री. जोशी जगन्नाथरायैः लोकसभा-प्रेक्षाकक्षं प्रवेशितः। तत्र चीनविषयिणी प्रखरा चर्चा प्रत्यक्षीकृता श्रुता च। मधु लिमये-प्रा. बलराज मधोक-भाई डाङ्गे-डॉ. राम मनोहर लोहिया-आचार्य कृपलानी इत्यादीनां भाषणानि प्रभाव-पूर्णानि। सुरक्षामन्त्री

आकाशवाणीकेन्द्रेषु संस्कृत - वार्ताः

न. दिल्ली — ५ जुलै ६७ (राजधानी-प्रतिनिधिः)

"भारतीय-नभोवाणी-द्वारा संस्कृत-वार्ताः प्रसारणीयाः इति विषयः शासनविचाराधीनः" इति निवेदितं नभोवाणी-मन्त्रिभिः गतदिने लोकसभायाम्।

"लता मङ्गेशकर-गीता **श्रीगीता** (पञ्चदशोऽध्यायः) इचिरमेव आकाशवाणीद्वारा प्रसारिता भवेत्।" इति 'शारदा'कारेभ्यः निवेदितं नभोवाणी-मन्त्रिभिः।

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

श्री. स्वर्णसिंहः निस्तेजस्कः भाति । युक्तप्रत्युत्तरार्थम् अक्षमः कथमपि संरक्ष्यते अयं सुरक्षामन्त्री लोकसभापतिना श्री. रड्डी इत्यनेन । उपसभापतित्वेन महाराष्ट्रतः (पुण्यपत्तन–मण्डलात्) निर्वाचितः सदस्यः श्री. खाडिलकर रघुनाथरायः सम्यक् तया कार्यं निर्वर्तयति ।

लोकसभायां सभापति–शिरोभागे विराजते विद्युदक्षराङ्कितं वचनं (ग्लोसाईन) धर्मचक्रप्रवर्तनाय । -इति । इयं विद्युदक्षरनलिका मित्रवरेण श्री. लक्ष्मीकान्त चक्रदेवेनैव समर्पिता लोकसभायै । लोकसभां प्रविष्टैः सपद्येव संमुखं द्रष्टुं शक्यते सुभाषितम् ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

दिल्ली-निवासे संप्रति महतो उष्णता पोडातिशयम् अनुभावयति । अत्युष्णाः वाताः कर्णरन्ध्रं तप्तवालुकाघातेन इव ताडयन्तः सर्वथैव असह्याः । जलं, जलं, जलम् ! कति नु कतिवारं पेयं जलम् । हिममिश्रितम् अपि तत् कवोष्णम् एव । कदा खलु पलायनं राजधानीतः सुशकम् इति चिन्तापरेणैव मया महता वेगेन समाप्ततां नीयन्ते सर्वाणि कार्याणि संकल्पितानि । वङ्गप्रदेशात् कॉङ्ग्रेसपक्षसदस्यत्वेन निर्वाचनं विजित्य यथापूर्वं लोकसभां प्रविष्टः पं. चपलाकान्तः भट्टाचार्यः गतदिने साक्षात्कृतः। दिल्लीम् आगत्य अयमेव सर्वातिशायी महान् लाभः इति मे मतम् । कथम् इति चेत् ? कथयामि ।

भारतीये संविधाने (कॉन्टिटचूशन) संशोधनं कृत्वा केन्द्रशासनभाषात्वेन हिन्दीभाषया सह संस्कृतम् अपि तत्र स्थाप्यताम् ' इति अतिमहत्त्वपूर्णः प्रस्तावः श्री. चपलाकान्त-भट्टाचार्यैः लोकसभायां विधेयकत्वेन विचारार्थं प्रेषितः सांप्रतिके कार्यकलापे लोकसभापतिभिः चर्चार्थं स्वीकृतः इति ज्ञात्वा कीदृशं नु खलु सहकार्यम् अत्र अस्माभिः कर्तुं शक्यम् इति विचारमग्नः अहम् ।

भारतवर्षे राष्ट्रैक्य-संपादनार्थम् अयमेव अनुत्तमः रामबाणः इव अमोघः उपायः इति मे मतम् । अस्य प्रस्तावस्य विधेयकत्वेन साफल्यार्थं सर्वैः भारतवर्षीयैः संस्कृतसेवकैः स्वसंमतिपत्राणां साहस्री भारतशासनं लोकसभापतिं, श्री. चपलाकान्तभट्टाचार्यं च उद्दिश्य प्रेषणीया इति साग्रहं मे प्रार्थना । इदमेव संप्रति कर्तव्यं धर्म-चक्र-प्रवर्तनाय !

बाबा
(वसन्त अ. गाडगीळ)

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

॥ श्रीशिवराज्योदये महाकाव्ये ३० तमः सर्गः ॥

मातृसन्तोषः

अथोरेरफझुल्लस्य कृत्तं देवद्रुहः शिरः ।
स्वीकृतं शिवराजेन सुहृदोपायनीकृतम् ॥१॥
विचित्रपञ्जरान्तस्तन्निधाय प्रेषितं द्रुतम् ।
युद्धवृत्तान्तजिज्ञासुं मातरं प्रति सत्वरम् ॥२॥
युद्धवार्ताहरः शत्रोः शिर आदाय निर्ययौ ।
पुत्रचिन्ताज्वलत्प्राणां जिजां राजगडास्थिताम् ॥३॥
स्ववक्त्रस्फुटदानन्दावेदितं स जयाश्रवम् ।
रिपुमूर्धानमुद्घाटय विना वाचमघोषयत् ॥४॥
देवद्रुहः पुत्रहन्तुर्भर्तृमानोपमर्दिनः ।
शिरः स्वपुत्रप्रहितं दृष्ट्वा सा शान्तिमन्वभूत् ॥५॥
न्यक्कृताः पीडिताः साध्व्य महिला अबला अपि ।
पापिनो ध्वंसमिच्छन्ति प्रतिशोधफलास्पदम् ॥६॥
तन्मुण्डमफझुल्लस्य सघृणं वीक्ष्य सा क्षणम् ।
प्राह रामायणी नीतिर्हते शत्रौ वलम्ब्यताम् ॥७॥
मरणान्तानि वैराणि देहिनामिह संसृतौ ।
हतस्यापि रिपोर्देहे धर्मकृत्यं हि युज्यते ॥८॥
अतः शरीरमेतस्य मुण्डमेतच्च दुर्भगम् ।
म्लेच्छाचारानुरोधेन ससम्मानं निखन्यताम् ॥९॥
यत्र स्थाने शिवेनायं देवद्रोही विदारितः ।
तत्रैव चिरमेतस्य चैत्यं लोकोऽवलोकताम् ॥१०॥
ये चान्ये बहुमानार्हाः समरे पञ्चतां गताः ।
तेषां वीरोचिताः शीघ्रं क्रियन्तामुत्तरक्रियाः ॥११॥
न हि शाश्वतिकोऽस्माकं द्वेषः केनापि सर्वथा ।
जीवताऽपि मनुष्येण किं पुनर्विगतासुना ॥१२॥
बन्दिग्राहं गृहीतास्यूद्विषन्तो ये च केचन ।
निर्वैमनस्याः कर्तव्याः साधुवृत्त्यैव तेऽखिलाः ॥१३॥
स सन्देशमिमं तस्या वीरमातुर्दयामयम् ।
शिवमावेदयांचक्रे जननीशब्दचातकम् ॥१४॥

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

तं धर्म्यतममादेशं मातुराकर्ण्य धार्मिकः ।
अन्वतिष्ठद्यथादिष्टं सुपुत्रो मातृदैवतः ॥१५॥
हतावशिष्टा ये वीराः शात्रवीया युयुत्सवः ।
बन्दिग्राहं गृहीतांस्तान् स्वयं सान्त्वयितुं ययौ ॥१६॥
प्रकृत्यैव हि सद्वीरा निर्वैराः सकले जने ।
न मनागपि विद्वेषं दधते जातु दुर्बले ॥१७॥
प्रक्षुब्धा अपि दौरात्म्यन्निष्कारणविरोधिनाम् ।
तदाश्रितेषु नैष्ठुर्यं नानिमित्तं प्रयुञ्जते ॥१८॥
रणदुल्लश्च झुंझारोऽम्बरश्च संपरिच्छदम् ।
पुत्रावप्यफझुल्लस्य प्राप्नुवन् रणबन्दिताम् ॥१९॥
शिवाजिः स्वयमायाति स्वान् प्रतीत्यवगह्यते ।
सामूहिकं शिरश्छेदमुत्प्रैक्षन्त हि बन्दिनः ॥२०॥
यथा यथा स निकषा पदात् पदमुपागमत् ।
तथा तथोच्चकैस्तेषां प्राणा गन्तुमिवोद्यताः २१॥
उत्तारलोचनाः सर्वेप्युपांशु दृढमस्मरन् ।
क्षणमस्मृतपूर्वं तं जगदीश दयाघनम् ॥२२॥
नूनं दयाघनः साक्षात् पुरतस्तैर्विलोकितः ।
शिवरूपेण तान् सर्वान् प्रेम्णालिङ्गितुमागतः ॥२३॥
तान् पृथक्पृथगाश्लिष्यन् स सौहार्देन दौहृदान् ।
समक्रामयदौदार्यं ध्रुवं तेष्वात्महृद्गतम् ॥२४॥
यदाश्लेषेण सेनानीस्तेषां निष्प्राणतां गतः ।
तदाश्लेषेण ते सर्वे लब्धप्राणा इवाभवन् ॥२५॥
प्रदीप्तविक्रमः पूर्वं पश्चात् कारुण्यसंप्लुतः ।
शिवाजिः स हि तैर्मेने तडिद्वानिव तोयदः ॥२६॥
तत्परामर्शमात्रेण निर्धूताखिलकल्मषैः ।
द्विषद्भिरपि तैर्जज्ञे सुवीराणां महात्मता ॥२७॥
तदकारणशत्रुत्वमफझुल्लस्य निष्ठुरम् ।
महात्मनाऽमुना स्मृत्वाऽखिद्यन् केचन बन्दिनः ॥२८॥
पलायांचक्रिरेऽरण्ये फाजलाऽकुश-याकुताः
खानोपाधिभृतश्चान्यौ मुसाहमनसंज्ञकौ ॥२९॥
जयावली-महारण्यभूपालपदलोलुपः ।
मोरेवंश्यः प्रतापश्च क्वचन स्वं निजुह्नुवे ॥३०॥

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

सुल्तानप्रमुखाश्चान्ये रिपुपक्ष-धुरन्धराः ।
दिशो जगृहिरे भीत्या गावो भग्नधुरा इव ॥३१॥
पलायनप्रवीणेषु तेषु खण्डोजिनामकः ।
विखण्डित-शरीराशः घोरारण्यान्तरं ययौ ॥३२॥
तं पश्चात्तापनिर्दग्धमपि स्वशरणागतम् ।
न चक्षमे शिवो नीचं स्वराज्यपथकण्टकम् ॥३३॥
अग्रहस्ताङ्घ्रिमाच्छिद्य तदीयं तमदण्डयत् ।
येन विद्रोहिणः सर्वे राष्ट्रधर्ममवागमन् ॥३४॥
अथात्मजयशोलाभप्रसन्नतममानसा ।
जिजा संयोजयामास कविता-गायनोत्सवम् ॥३५॥
अज्ञानदासनामानमाशुकाव्यविशारदम् ।
कविमामन्त्रयामास जयानन्दवती सती ॥३६॥
बाजि-कान्होजि-नेताजि-तानाजि-प्रमुखांस्तथा ।
सङ्ग्रामसुहृदः सर्वान् वीरानामन्त्रयत् स्वयम् ॥३७॥
आलम्बनविभावा हि नूनं वीररसस्य ते ।
स्वविक्रमकथाकाव्यं श्रोतुकामाः समामिलन् ॥३८॥
ततो मातृद्वितीये श्रीशिवराजे समागते ।
जयघोषैः प्रवीराणां दध्वनुः सह्यकन्दराः ॥३९॥
स राजमातुरादेशं मूर्ध्ना सम्मान्य सत्कविः ।
प्रतापदुर्गसङ्ग्रामगीतं गातुं प्रचक्रमे ॥४०॥
कवेरङ्गुलिनिर्घातैस्ताड्यमानः पदे पदे ।
मुरजो मुखरीभूतो नूनं काव्यानुगायने ॥४१॥
प्रचलत्तर्जनीस्पर्शैस्तारतारतरं स्वरम् ।
तन्त्रीपङ्क्ती रणन्तीव रुद्रवीणाऽभवत्तदा ॥४२॥
सुगीतं गायता तेन काव्यनायकसम्मुखम् ।
चञ्चत्पदं महाराष्ट्री ताण्डवं खलु शिक्षिता ॥४३॥
अनलंकारहृद्यं तत्काव्यं वीररसोत्तरम् ।
सोल्लासमुच्चकैर्गायन् कवी रसमयोऽभवत् ॥४४॥
येषां येषां हि नामानि कवितागुम्फितान्यसौ ।
उज्जगावुच्चकैस्तेषु शिवोरत्नान्यवाकिरत् ॥४५॥
वीरमाता जिजा तत्र हर्षास्राप्लुतलोचना ।
पपौ स्वपुत्रस्तोत्रं तत् कर्णीकृतकलेवरा ॥४६॥

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

न भूता न भविष्यन्ति मातरो हि जिजानिभाः ।
पुत्रविक्रममुस्तोत्रकाव्यपीयूषतर्पिताः ॥४७॥
अमृतं नामृतं नूनं क्षीरसागरसम्भवम् ।
मातृणां गुणवत्पुत्रस्तोत्रं हि परमामृतम् ॥४८॥
वात्सल्यरससंभूत-स्फीतगद्गदिकाकुला ।
तत्काव्यश्रवणादाप सा सद्यः परनिर्वृतिम् ॥४९॥
स्वस्तोत्रमिति न प्रीतः प्रीतः कविगुणैः परम् ।
गुणगृह्यः शिवः स्वर्णाभरणं कवये ददौ ॥५०॥
शिवसम्मुखमुद्गीतं तत् सुकाव्यं रसोत्कटम् ।
जगुर्बाला युवानश्च ग्रामे ग्रामे गृहे गृहे ॥५१॥
विजापुरीया दिल्लीया यवनाः शिवशत्रवः ।
रणोदन्तेन निर्दान्ता मन्त्रेणेव भुजङ्गमाः ॥५२॥
इति प्रखरविक्रमोज्ज्वलं प्रबलशत्रुनिर्दालनो-
द्भवं शिवयशश्चिरं कविवरैः सहस्राधिकैः ।
असंख्यकविताकथाप्रवचनेषु गीतं मुदा ।
स्वयं स्फुरति भारती नरवरस्तवोद्गायने ॥५३॥

॥ इति श्रीधर भास्कर वर्णेकर-विरचिते शिवराज्योदये महाकाव्ये
मातृसन्तोषो नाम त्रिंशः सर्गः समाप्तः ॥

स्मर्यताम् राष्ट्रदेवो भव त्वर्यताम्
राष्ट्ररक्षणार्थम् ..... बलसंवर्धनम्
बलसंवर्धनार्थम्.....मिष्टान्नसेवनम्
सर्वोत्कृष्टमिष्टान्नार्थं सत्वरं द्रष्टव्याः
दूरवाणी] शर्मा स्वीट मार्ट [७२३२
दत्तमन्दिरसमीपे पूणे २.

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

बिर्ला-मन्दिरे जगद्गुरु-स्वागतम्

(भारतराजधान्यां पू. शृङ्गगिरिजगद्गुरुश्रीशंकराचार्य-स्वागतभाषणम्।)

सभापतिमहोदयाः समागत-सज्जनाश्च,

भगवता श्रीकृष्णेन उक्तमस्ति श्रीमद्भगवद्गीतायां— 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥' श्री भगवतः एतद्वचनानुसारं पूर्वस्मिन् काले भारतवर्षे यदा सनातनार्यधर्मस्य ह्रासोऽभवत्, अधर्मस्य उत्थानमभूत्, समाजस्य मर्यादा छिन्नाभिन्नाभवत्, जनाः अधर्माभिभवात् उच्छृङ्खलाः भ्रष्टाचाराः धर्मविरोधिनः यथेच्छाचारिणः अभवन्, तदा भगवान् शंकरः जगद्गुरु-श्रीआदिशंकराचार्यरूपेण दुष्कृतां पापिनां धर्मविद्वेषिणां विनाशाय, धर्मसंस्थापनाय च अवतारं गृहीत्वा धर्मस्य पुनरुद्धारं कृतवान् समाजस्य मर्यादां स्थापितवांश्च। भारतवर्षस्य तादृशी एव दुर्दशा अधुनाऽपि वर्तते। इदानीमपि दिनानुदिनं धर्मस्य ह्रासो जायते। अधर्मस्य अभ्युत्थानं वर्तते। जनाः भ्रष्टाचाराः अधर्माचरणे लग्नाः धर्मस्य मूलमपि छेत्तुं तत्पराः सन्ति। अस्माकं युवकाः युवतयश्च धर्मशिक्षाभावात् पाश्चात्यसभ्यताया चकाचकप्रकाशेन अन्धीभूताः उच्छृङ्खलाः सर्वमर्यादां विहाय यथेच्छाचारे लग्नाः स्वयमेव पतन्ति देशमपि पातयन्ति च। अस्माकं पुण्यभूमिः भारतमाता खण्डितीकृता। कोटिशः भारतीयाः यवनानां शासन-काले अत्याचारेण पीडिताः। अनेकैः प्रलोभनैश्च स्वधर्मं विहाय धर्मान्तरग्रहणाय विवशीकृताः। वर्तमानकालेऽपि अस्मासु पश्यत्सु अस्माकम् उदासीनतया सरकारस्य धर्मनिरपेक्षनीत्या च विदेशीय-ख्रिस्त-मिश्नरी-प्रचारकाः प्रचुरधन-बलेन अनेकैः प्रलोभनैश्च हरिजनानां पर्वतेषु वनेषु वासिनां च आर्यधर्मिणां हिन्दूनां धर्मान्तरकरणे लग्नाः सन्ति। अद्यपर्यन्तम् एककोट्यधिकाः हिन्दवः स्वधर्मं विहाय ईसाईमतावलम्बिनः संजाताः। अस्यां शोचनीयपरिस्थित्यां केवलं श्रीमद्जगद्गुरवः श्रीशंकराचार्यमहोदयाः एव अस्माकं हिन्दूनाम् उद्धारे समर्थाः सन्ति इति आशास्महे वयम्। एते जगद्गुरवः श्रीशंकराचार्यमहोदयाः शुभागमनेन दिल्लीनगरं सुशोभिवन्तः इति एतद् अस्माकं महद् सौभाग्यमस्ति। अद्य अस्मिन् बिरलामन्दिरे एतेषां जगद्गुरूणां अनेकनरपतिसमभ्यर्चितचरणानां सर्वशास्त्रनिष्णातानां विद्वद्वराणां यशसा धवलीकृतजगतां पूज्यपादानां श्रीमच्छंकराचार्यमहोदयानां स्वागतं विधाय कृतकृत्याः स्मः वयम्। एतद् हार्दिकश्रद्धासूचकम् अभिवादनपूर्वकं स्वागतं स्वीकुर्वन्तु जगद्गुरवः इति प्रार्थ्यन्ते अस्माभिः।

२५, मलकागञ्ज-मार्गः
जवाहरनगरम् दिल्ली ७

जनार्दनभट्टाचार्यः
आर्य-धर्म-सेवा-संघ-कार्यदर्शी

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

शारदा–(पुण्यपत्तनम् २.) ८ : १७ * रजि. क्र. एम्. एच्. ५५७
० लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

शा र दा–गौ र व–ग्र न्थ मा ला

पुष्पम्		लेखकः	मूल्यम्
१.	श्रीराजेन्द्रप्रसादचरितम्	— पं. वासुदेवशास्त्री लाटकर	३.००
२.	वात्सल्यरसायनम्	— प्रा. श्री. भा. वर्णेकर	१.००
३.	शिक्षेषा सात्त्विकी सताम्	— प्रा. रं. रा. देशपाण्डे	२.००
४.	श्रीरामकृष्णपरमहंसीयम्	— प्रा. श्री. भा. वर्णेकर	१.२५
५.	बालपिता जवाहरः	— पं. विष्णुहरि देव	०.४०
६.	श्रीमान् विस्टनः चर्चिलः	— पं. औदुम्बरकर शास्त्री	०.६४
७.	अप्पासरस्वती : साहित्यसमीक्षा	— प्रा. अशोक अकलूजकर	२.००
८.	श्रीशिवराज्योदयमहाकाव्यम्	— प्रा. श्री. भा. वर्णेकर (क्रमशः)	
९.	'समानमस्तु वो मनः'	— डॉ. ग. बा. पळसुले	३.००
१०.	मराठी–संस्कृत-शब्दकोषः	— जोशी-परांजपे-गाडगीळ (क्रमशः)	
११.	भूपो भिषक्त्वं गतः ।	— पं. ग. पां. लोण्ढेशास्त्री	१.००
१२.	विनायक-वीर-गाथा	— डॉ. ग. बा. पळसुले	३.००
१३.	आङ्गलघुकाव्यानुवादमाला	— पं. ल. ज. खरे	२.००
१४.	श्रीराजयोगभाष्यम्	— डॉ. चिं. त्र्यं. केळकर	५.००

प त्र व्य व हा र स्था न म्

'शारदा' – कार्यालयः पुण्यपत्तनम् २.

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगोळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार,४९८ शनिवार,पुण्यपत्तनम् २.
२.–श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

Govesment college ANANTNAG (Kashmir)

संस्कृत-सभा-पुणे २ पाक्षिक मुखपत्रम्

भारतवाणी

संस्कृतिः संस्कृताश्रिता

Regd. No. B 774

प्रधानसंपादकः व्यवस्थापकश्च
डॉ. व. ग. राहूरकर
एम्.ए., पीएच्.डी.
स्थानम्: १४४२-४३ सदाशिव,
स. प. महाविद्यालयसमीपम्,
रावेतकर सदन, पुणे २
एकस्य अङ्कस्य मूल्यम् रु. ०.२५

प्रधानसंपादकः—डॉ. व. ग. राहूरकर, एम्.ए., पीएच्.डी.
कार्यकारिसंपादकः—पं. ग. श्री. वारे, एम्.ए., वेदान्तशास्त्री

वर्षम् ६, अङ्कौ ७-८] श्रीगणपत्यथर्वशीर्ष—विशेषाङ्कः [वार्षिक-मूल्यम् रु. ५

म. म. मीमांसाभूषण-श्रीधर-अण्णाशास्त्रि-वारे-महाभागः

भारतवाणी संपादकयोः प्राध्यापकत्वेन नियुक्तिः

भारतवाण्याः प्रधानसंपादकानां प्रा. डॉ. व. ग. राहूरकरमहोदयानां पुणे विद्यापीठस्य संस्कृतविभागे प्राध्यापकत्वेन (Lecturer) नियुक्तिः समजनि। कार्यकारि-संपादकानां प्रा. पं. ग. श्री. वारे शास्त्रिणां 'व.ई' नगरस्थ प्राज्ञपाठशाळा मण्डलस्य महाविद्यालये (Arts and Commerce College) संस्कृतं तथा प्राचीन भारतीया संस्कृतिः इति विभागे प्राध्यापकत्वेन (Lecturer) नियुक्तिः समजनि।

संस्कृत संमेलन-म. म. वारेशास्त्रि-षष्टयब्दी-गौरव समारोह-व्यग्रत्वात् संपादकानाम् अस्य अङ्कस्य पृष्ठन्यूनत्वं सोढव्यं ग्राहकैः इति सप्रश्रयं प्रार्थ्यते।

महाराष्ट्र संस्कृत परिषद्, तृतीयम् अधिवेशनम् नासिक तथा म. म. पं. श्रीधर शास्त्री वारे षष्टयब्दी सत्कार समारोहः

मान्याः,

पूर्वोद्घोषणानुसारं महाराष्ट्र संस्कृत परिषदः तृतीयम् अधिवेशनं श्री नासिक क्षेत्रे संपत्स्यते आगामिनि मे मासि संमेलनस्य आयोजन म. म. पं. श्रीधर अण्णाशास्त्री महाभागानां षष्टयब्दी सत्कार समारोहेण संवादितरेव भविष्यति।

मे मासि ज्येष्ठ शु. २-३-४ शके १८८५ २४, २५, २६ दिनाङ्केषु कार्यक्रम एष संपन्नतां यास्यति। कार्यक्रमस्य सर्वसामान्या रूपरेषा—

दि. २४-५-६३ ज्येष्ठ शु. २।१८८५ शतचण्डीयागः प्रातः ७ तः १२

दि. २५-५-६३ ज्येष्ठ शु. ३।१८८५ म. म. पं. श्रीधर शास्त्रि-वारे महाभागानां षष्टयब्दी शान्तिः प्रातः ७ तः १०

अपराह्णे संस्कृत संमेलनस्योद्घाटनम् श्री. भारदेमहोदयानाम् आयध्क्ष्ये। सायं ४ तः ७

रात्रौ ९ विषयनियामक समिति सभा

दि. २६-५-६३ ज्येष्ठ शु. ४ श. १८८५

प्रातः ८ तः १०॥ संस्कृत संमेलनं पं. दत्तात्रेयशास्त्रि-कवीश्वराणाम् आध्यक्ष्ये। म. सं. परिषदः साधारणी सभा—१०॥ तः ११॥ संस्कृतवक्तृत्वम् सायं. २॥ तः ५ संस्कृत संमेलन समारोपः

सायं. ५ तः ८ म. म. पं. श्रीधर शास्त्रि वारे षष्टयब्दी सत्कारसमारोहः

संमेलनेऽस्मिन् संस्कृत काव्य गायनं, संस्कृतवक्तृत्वं इत्यादिकाः कार्यक्रमाः विशिष्य आयोजिता भविष्यति संस्कृत वक्तृत्वं-विषयाः

१ सर्वं सरलसंस्कृतम्
२ सर्वभाषाजननी संस्कृतम् तस्याः सार्वत्रिकः प्रसारः
३ संस्कृतिः संस्कृताश्रिता
४ वेद विद्यायाः संस्कृतविद्यायाश्च परम्परा संरक्षणम्

प्रचारमंत्री	कार्यवाह
ग. श्री. वारेशास्त्री	सी. रं. जोशी
श्री. धुं. कवीश्वर	पु. वा. क्षेमकल्याणी
	ना. वा. दीक्षित

म. म. पं. श्रीधरशास्त्री वारे-सत्कार समितिः, नासिक
अध्यक्षः—पं. तर्कतीर्थ लक्ष्मणशास्त्री जोशी
डॉ. गो. वि. देवस्थळी
कार्याध्यक्षः—श्री. पु. रा. बुरकुले, वकील
कार्यवाहाः—(१) श्री. ल. वा. दीक्षित, (२) श्रे. पु. वि. डाबरे, (१) श्री. वि. त्र्यं. शेटे, (४) श्री. रघुवीर भालेराव.

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

—श्रीशः शरणम्—

अथ गणेशाथर्वशीर्षोपनिषत्।

[म.म. श्रीधरशास्त्रि-वारेविरचित-सुधाख्य व्याख्यया संवलिता।]

प्रारम्भे कुलदेवतामिह महालक्ष्मीयुतां रेणुकां
भक्ताभीष्टकरीं मतिस्मृतियशोऽर्थायुःपरानन्ददाम्।
प्रत्यूहौघविदारणक्षममथो हैमातुरं शारदां
सूर्यं शुक्लयजुःप्रवर्तकमृषिं श्रीयाज्ञवल्क्यं नुमः ॥ १ ॥
अज्ञानवार्धिं परिशुष्य यन्मे ज्ञानं त्वदाद्याश्रुतितन्त्रयुग्मम् ॥
यत्क्षोणिचन्दारकवृन्दवन्द्यं नित्यं नमामो गुरुमण्डलं तत् ॥ २ ॥
ॐ नमः श्री मत्सद्गुरुहृदयानन्दसरस्वतीचरणकमलेभ्यः ॥३॥
ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यः श्रुतर्षिभ्यो नमो गुरुभ्यः ॥ ४ ॥
प्रत्यूहतूलज्वलने सुरेड्ये प्रणम्य हेरम्बपदारविन्दे ।
प्रज्ञावतां स्वस्य च तोषहेतोर्व्याख्यास्यतेऽथर्वशिरो गणेष्टुः ॥५॥
यतोऽस्ति प्राक्तनं भाष्यं विषमं विततं ततः ।
नवीनां सुगमां व्याख्यां कुर्वे नाम्ना सुधामिमाम् ॥ ६ ॥

अथाथर्वमुनिर्मुमुक्षून्सकलाञ्जीवाननुजिघृक्षया जीवशिवयोरैक्यानुसन्धानफलकं तत्प्रापकसुलभकर्मोपासनज्ञानात्मकं गणेशाथर्वशीर्षसंज्ञकं स्वाविर्भूतं श्रौतमध्यात्म प्रकरणंप्रादुष्करोति—

ॐ नमस्ते गणपतये।

अवति रक्षति विश्वमिति ॐ ब्रह्मैव गणेशः। "ॐ इत्येतद्ब्रह्म" इत्येतच्छ्रुतेः। "ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा" इति भगवद्गीतास्मृतेः। "तस्य वाचकः प्रणवः" इति पातञ्जलयोगसूत्रात्। "अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः। तस्योङ्कारः स्मृतो नाम तेनाहूतः प्रसीदति" इति स्मृतेः। "ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठम्। तस्मिन्हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोकः" इति महाभाष्यकृदुक्तेश्च। तस्सिद्धमोङ्कारवाचकत्वं ब्रह्मणः। किञ्च—गणेशो वक्ष्यति च तस्मादेवं "गणानामेत्या गणपतिर्हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीदसादनम्" इति (२।२३।१) ऋक्श्रुतेः तद्विद्याधिदं विश्वं। सर्वं भूतं भव्यं जायमानं च। तत्सर्वमित्याचक्षते। [अस्माज्ज्ञातः परं किञ्चित्। यो वेद स वेद ब्रह्म। ब्रह्मैवाप्नोति—तत्सर्वमित्याचक्षते।] ब्रह्मविष्ण्वादिगणानामीशभूतमित्याह 'तद्गणेश' इति तत्परमित्याह-'यमेते नाप्नुवन्ति" इति गणेशतापिनी श्रुतेश्चेति ॥

अथैतस्योङ्कारस्य वेदादाविव तदेकदेशस्यास्य गणेशाथर्वशीर्ष संज्ञकप्रकरणस्यारम्भे समुच्चारणं न्याय्यम्। अथर्ववेदेऽस्य गणेशाथर्वशीर्षस्य गणेशब्रह्मविद्यारूपविशिष्टार्थप्रतिपादकस्वतन्त्रप्रकरणत्वात्। तथा चात्रश्रूयते—"यो वेदादौ स्वरः प्रोक्तः" (३।३) इति छान्दोग्यश्रुतेः। स्वरः प्रणवः। स्मर्यते चापि—"ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं पुरस्ताच्च विशीर्यति" (२।७४) इति मनूक्तेः। "प्रणवं प्राग्प्रयुञ्जीत व्याहृतीस्तदनन्तरम्। सावित्रीं चानुपूर्व्येण ततो वेदान्समारभेत्" इति शिक्षायां याज्ञवल्क्योक्तेः। "ओंकारमुक्त्वा त्रिश्च सावित्रीमध्याद्यादीम्प्रब्रूयात्" (२।९) स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः। "ॐ गणेशो वै ब्रह्म। इति मन्त्रोपनिषद्वेदबीजं सनातनम्॥ (१२।६।४१) पारस्करगृह्योक्तेश्च। ननु-मङ्गलार्थत्वं कुतो न स्वीक्रियते प्रणवस्य। "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ" इति स्मृतेरिति चेन्न, स्वतो मङ्गलरूपेष्वपीतरेषेषु वेदेषु प्रत्यूहशङ्काया अनुदयात्तन्निवृत्त्यर्थं तस्यान-पेक्षणात्। वेदेषु तादृङ्मङ्गलाचरणस्य क्वाप्यदृष्टचरत्वाच्च। एवञ्च सति प्रणवस्यारम्भार्थकत्वं स्वीकार्यमापतति। न च "अनन्ता वै वेदाः' इत्यादि श्रुतिविरोधो वा वेदानामारम्भादिकल्पनासम्भवविरोधो वा वाच्यः। एतदुक्तश्रुतीनामपरिच्छिन्नत्वाद्यन्यार्थप्रतिपादकत्वात्प्रागनुपदोक्तस्मृतिवशात्स्वाध्यायारम्भे प्रागुच्चारणत्वस्य सिद्धत्वाच्च। अत एतदर्थमादावोङ्कारस्योपदेश इति॥ अस्याथर्ववेदवर्तित ओङ्कारस्य स्वरूपमुक्तं गोपथब्राह्मणे—'ह्रस्वो दात्त एकाक्षर ओङ्कारोऽथर्ववेदे" (१।२५) इति ॥

एवमोङ्कारमुक्त्वा स्वस्योपासकत्वप्रसिद्ध्यर्थं स्वाभीष्टमुपास्यं गणेशं ब्रह्म नामसम्त्रेण नमस्करोति—नम इति।

—लोकवेद प्रसिद्धाय गणपतये देवानुचरा भूतविशेषाः प्रमथाद्या रुद्रगणा वा तेषां पतिः पालकस्तस्मै। यद्वा ब्रह्मविष्णुवसुरुदादित्यगणानां पतिरधीशस्तस्मै। तदुक्तं गणेशतापिन्यां—"ब्रह्मविष्ण्वादिगणानामीशभूतमित्याह 'तद्गणेश' इति" इति। यद्वा गणशब्दस्तु समूहवाची तद्योगेन तदन्तरैक्यभावनया ये रूपाः समूहा ये च विविधा [illegible]समूहास्तेषामीशानस्तस्मै। तदुक्तं मुद्गलपुराणे—"गणशब्दः समूहस्य वाचकः परिकीर्तितः। समूहा योगरूपाश्च बाह्यान्तरैक्यभावतः॥ अज्ञानां सकलानां वै समूहेऽज्ञमयं परम्। कथितं ब्रह्म वेदेतदेवं नानागणाः स्मृताः॥ तेषां स्वामी गणेशानस्तं ज्ञात्वा योगिनः पुरा। शान्तिं प्राप्ता विशेषेण योगशान्तिमयं परम्" इति॥ अथवा—दृश्यादृश्य स्वरूपं मनोवाणीमयं यत्तद्गकारात्मकं, संयोगायोगस्वरूपंमनोवाणी विहीनं यत्तण्णकारात्मकं, गकारात्प्रसूतानि तत्त्वरूपाणि ब्रह्माणि, णकारात्प्रसूतानि निरोधात्मकरूपाणि ब्रह्माणि, एतेषां निदर्शकौ ब्रह्माकारौ गकारणकारौ,। तयोरेतयोर्योगरूपेण यः स्वामित्वेन संस्थितः स गणपतिस्तस्मै। तथा चोक्तं तत्रैव मुद्गलपुराणे—"कथितं सामवेदे यच्छृणु वेद रहस्यकम्। येन त्वं शान्तिसंयुक्तो भविष्यसि न संशयः॥ मनोवाणीमयं सर्वं दृश्यादृश्यस्वरूपकम्। ग कारात्मकमेवं तत्तत्र ब्रह्म गकारात्मकम्॥ मनोवाणीविहीनं च संयोगायोगसंस्थितम्। णकारात्मकं ब्रह्म तण्णकारस्तत्र संस्थितः॥ विविधानि ग काराच्च प्रसूतानि महामते। ब्रह्माणि तानि कथ्यन्ते तत्त्वरूपाणि योगिभिः॥ णकाराच्च प्रसूतानि ब्रह्माणि [illegible] योगिभिः। निरोधात्मकरूपाणि कथितानि समन्तत[illegible] णकारस्तानि गच्छन्तेः स्थितौ [illegible] श्रुतेर्मुखात्॥ तयोः स्वामी गणेशश्च योगरूप[illegible] विधानेन शान्तिमार्गेण पुत्रक" इति॥ नमो नमःक्रिया-का वाङ्मनोभिः स्वापकर्षद्योतनानुकूलव्यापारोऽस्त्विति शेषः॥

ननु—नाममन्त्रे सर्वत्र नमः पदमन्ते प्रयुक्तम्। तथा चाम्यधायि—"आदितः प्रणवं कृत्वा मध्ये देवाभिधानकम्। चतुर्थ्या संयुतं कुर्यादन्ते नमः पदं तथा॥ एष नाममनुः ख्यातो देवाह्वान विसर्जने" इति॥ अत्र तु तद्वैपरीत्यं बाढं परं च तच्छान्दसत्वात्तथा मन्तव्यमेवेति समाधेयम् वेदेऽन्यत्र 'नमः शम्भवाय' इति निदर्शनात्॥"

एवं स्वाभीष्टोपास्यगणेशदेवताया नमनं विधायेदानीं तस्यां गणेशदेवताया ब्रह्मात्मनोपासितुं 'तत्त्वमसि' महावाक्यप्रतिपादित-ब्रह्मरूपत्वमुपवर्णयति—

त्वमेव प्रत्यक्षं तत्त्वमसि।

त्वमेव भवान्गणेश एव। अयमेवकारोऽयोगव्यवच्छेदार्थकः। ते न स गणेशस्य ब्रह्मत्वं द्रढयति। प्रत्यक्षं साक्षात् उपासकस्येतर प्रमाणनिरपेक्षानुभवप्रमाणत्वात्। 'तत्त्वमसि' एतन्महावाक्यार्थनिरूपिताखण्डैकरसं ब्रह्मासि। तथा हि—एतन्महावाक्यं सम्बन्धत्रयं पुरस्कृत्याखण्डार्थमवबोधयति। सम्बन्धत्रयञ्चैवमाहुः—"सामाधिकरण्यञ्च विशेषणविशेष्यता। लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्ययागमनाम्" इति। तत्र परोक्षत्वसर्वज्ञत्वसर्वविस्वादि वैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तम्। अपरोक्षत्वकिञ्चिज्ज्ञत्वादिवैशिष्ट्यं त्वम्पदप्रवृत्तिनिमित्तम्। अनयोर्भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वम्पदयोरेकस्मिंश्चैतन्ये तात्पर्यग्रहणात्सामानाधिकरण्यसम्बन्धः त्वम्पदवाच्यपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टं चैतन्यं तत्पदाभिधेयासर्वज्ञत्वपरोक्षत्वादिविशिष्टचैतन्याद्भिन्नं न प्रतीयते यदा तदा तच्छब्दाभिधेयार्थस्य त्वम्पदार्थनिष्ठभेद-

Swami Amrit Vagbhav Acharya Collection, New Delhi. Digitization eGangotri

Vidwat Varkala Shri Radha Krishna Dharmika Samsthan, New Delhi

गजाननो विघ्नराजो बभूव। तदाप्रभृति गणेशेनायं नियमोऽकारि यद्यत् मम स्मरणार्चनादिविहीनं कर्म तत्र तत्रैव त्वयोपस्थातव्यं नान्यत्रेति॥ तथा चोक्तं—"उक्त्वैवमाह्हयत्स्कन्दः शक्रस्तं काल-रूपिणम्। य इदं मायया मोह्य कलयत्यखिलं जगत्॥ विघ्नरूपेण घोरेण स कोलपुरुषो भुवि। गर्जनादखिलालोकान्कम्पयामास वेगवान्॥" इत्याद्यन्यत्र स्कान्दादौ विस्तरः॥ शिवसुताय रुद्र-पुत्राय। "शिवस्य तपःपूर्वकप्रार्थनया गणेशः शिवपुत्रोऽभवदिति स्कान्दे विनायकमाहात्म्ये मयूरेश्वरोपाख्याने कथाप्रसङ्गात्। तदुक्तं तत्रैव—"ध्याने मनसि मे जातः पुत्र त्वं पालय प्रभो। मम पुत्र इति ख्यातो लोकेऽस्मिन्भगवन्भव॥" इति॥ वरदमूर्तये वरमभिलषितं ददातीति वरदा मूर्तिर्देहोऽवतारो यस्य तस्मै। देव-दानवमानवादिभ्योऽनेकदावरदानाय तदनुगुणावतारधारित्वादिति भावः। अत्र 'श्रीवरदमूर्तये नमः' इति श्रीपूर्वकः पाठस्तु प्रामा-दिकः। वैदिकपरम्परायां तादृपाठाश्रवणात्॥ 'नमो व्रातपतय इत्यारभ्य वरदमूर्तये नम इत्यन्तमष्टौ नामानि स्तुत्यर्थमभिहितानि। एतैरष्टभिर्नामभिर्विहिता स्तुतिर्गणेशायात्यन्तं प्रियेति हृद्यम्॥१०॥

॥ इति दशमखण्डो व्याख्यातः॥ १० ॥

एवं दशभिः खण्डैः स्वोपास्यगाणेशब्रह्मनिरूपकं गणेशाथर्वशीर्ष-संज्ञकमध्यात्मप्रधानं प्रथममंशं प्रतिपाद्येदानीं तदीयविनियोगफल-श्रुत्यादिनिरूपकं द्वितीयमंशं प्रतिपादयति—

एतदथर्वशीर्षं योऽधीते। स ब्रह्मभूयाय कल्पते।
स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते।
पञ्चमहापापात्प्रमुच्यते। सायमधीयानो दिवस-
सकृतं पापं नाशयति। प्रातरधीयानो रात्रि-
कृतं पापं नाशयति। सायम्प्रातः प्रयुञ्जानो
अपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति।
धर्ममर्थं कामं मोक्षं च विन्दति। इदमथर्वशीर्षम-
शिष्याय न देयम्। यो यदि मोहाद्दास्यति स
पापीयान्भवति॥ ११॥

॥ इत्येकादशः खण्डः॥ ११॥

[illegible]विदंस्यार्थर्वशीर्षस्याध्ययनफलश्रुतिमभिधत्तेव [illegible]त् गणेशब्रह्मप्रकाशकं अथर्वणा मुनिना दृष्टं शीर्षं वेद-शिरोभागं अधीते गुरुमुखाच्छ्रुत्वा पठति। स उपासकः ब्रह्म भवतीति ब्रह्मभूयस्तस्मै ब्रह्मभावाय कल्पते समर्थो भवति। "ब्रह्म-विद् ब्रह्मैव भवति"। यो यच्छुद्धः स एव" इत्यादि श्रुतिस्मृतिभ्यः। पुनश्च स उपासकः सर्वविघ्नैः धर्मार्थकाममोक्षसाधनानुष्ठानेषु दैव-मानुषभौतिकादिप्रकारैरन्तरायैर्न बाध्यते पीडितो न भवति। पुनरपि स उपासकः सर्वतः सर्वांशेन सर्वभावेन च सुखं क्लेशरहितं यथास्यात्तथा एधते वृद्धिमभ्युदयं याति। पुनरपि स उपासकः पञ्चमहापापात् ब्रह्महत्यासुरापानगुरुतल्पगमनसुवर्णस्तेपतत्सं-सर्गयुक्ताचेति पञ्चविधमहापातकात् प्रमुच्यते तैर्निर्लेपः सन् शुद्धो भवति। यत्र पञ्चमहापातकात्प्रमुक्तिस्तत्र किमु वक्तव्यं ततोऽन्य-लघु-लघुतर-लघुतम-पातका त्प्रमुक्तिरिति कैमुतिकन्याय सिद्धमेत-दिति। पुनश्चोपासकः सायंप्रदोषेऽधीयानः पठन दिव सकृतं दिवा प्रमादादिनाऽमतिपूर्वं सम्पादितं पापं पापसाधकं दुष्कर्म नाशयति विनष्टं करोति। प्रातः अरुणोदये सूर्योदये वा रात्रिकृतं रात्रौ सम्पादितं अन्यत्सर्वं पूर्ववाक्यवद्व्याख्येयम्। एवं नियमेन सायम्प्रातः प्रयुञ्जानः पाठप्रयोगं कुर्वाणः अपापः पापवर्जितो भवति। सर्वत्र नानाकार्येषु आदावधीयानः पाठकर्ता अपगता दूरीभूता विघ्ना यस्य तादृशः समुत्सारितान्तरायो भवति। धर्ममिष्टाप्यनिष्टवृत्यर्थम-लौकिकमुपायं, अर्थं भोगस्वर्गापवर्गसाधनाद्यर्थं द्रव्यं, कामं धर्मार्थसम्बन्धिनं सम्यक्सङ्कल्पं, मोक्षं इहामुत्रफलभोग-विरागपूर्विकया मुमुक्षयाऽऽत्मनिष्ठां, च विन्दति लभते। अथर्व-शीर्षाध्याय्येवं क्रमेण मुक्तो भवतीति भावः। 'धर्मार्थकाममोक्षं च इति पाठे समाहारद्वन्द्वः॥ एवमध्ययनफलश्रुतिमभिधायेदानी-मेतदथर्वशीर्षशीर्षं शिष्यलक्षणवर्जिताय न देयमित्यध्ययनप्रस-ङ्गात्प्रतिषेधयति—इदं प्रकृतं अथर्वशीर्षं गणेशायशीर्षं अशिष्याय "प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे। गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे" इति भग-वत्पादाचार्यैरुक्तशिष्यलक्षणवर्जिताय न देयं नवोपदेष्टव्यम् नाध्या-पनीयमिति यावत्। "विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्ष मां असूयकाय मोऽदास्तथा। स्यां वीर्यवत्तमा" इति छान्दोग्यान्म-नुस्मृतेश्च। यः गुरुर्यदि मोहात् द्रव्यशुश्रूषादिलोभवशाद्दास्यति अध्यापेष्यिष्यति स पापीयान्पापभाग्भवति। इति प्रतिषेधफलार्थ-वादः॥ इत्येकादशः खण्डो व्याख्यातः॥ ११॥

एवं प्रतिषेधमुक्त्वाऽधुना विनियोगानुपक्रमते—

सहस्रावर्तनाद्यं यं काममधीते तं तमने न साधयेत्। अनेन गण-पतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नञ्जपति स विद्या-वान् भवति। इत्यथर्वणवाक्यम् ब्रह्माद्यावरणं विद्यात्। न बिभेति कदाचनेति॥ १२॥

इति द्वादशः खण्डः॥ १२॥

उपासिता यं यं कामं मनोऽभिलषितमुद्दिश्याधीते पठति तं तं काममनेन गणेशाथर्वशीर्षेण सहस्रावर्तनात् दशशत-सङ्ख्यावृत्तिकरणात् साधयेत्प्राप्नुयात् "सहस्रावर्तनात्" इति पद-मुत्तरवाक्येषु सर्वत्रानुषञ्जनीयम्। यः अनेन गणेशाथर्वशीर्षेण गणपतिं सहस्रावर्तनं कृत्वाभिषिञ्चति स वाग्मी प्रशस्तवाक् भवति। यः चतुर्थ्यां शुक्लायां विनायक्यां कृष्णायां संकष्टहर्त्यां वा अनश्नञ्जि-राहारं कुर्वन् सहस्रावर्तनं कृत्वा एतद्गणेशाथर्वं जपति पठति स विद्यावान् परापरोभयविद्यामण्डितः पण्डितो भवति। इत्येवम्प्रकारकमथर्वणमुनेर्वाक्यमाद्देशः। उक्ता वक्ष्यमाणाश्च विनियोगाः केन दृष्टा अभिहिताश्चेत्यपेक्षायां मध्ये एव देहली-दीपन्यायेन सर्वत्र प्रसरार्थमयमादेशवाक्यनिवेश इति यः उपासिता ब्रह्मादीनां हिरण्यगर्भप्रभृतिपिपीलिकान्तानां यन्माया-रूपमावरणं तद्विद्यात् जानीयात्। ततश्च कदाचन कस्मिन्नपि काले क्वापि कुतश्चिदपि न बिभेतिभयं प्राप्नोति। इति शब्दः खण्डसमाप्ति-द्योतनार्थः॥ १२॥ इति द्वादशः खण्डो व्याख्यातः॥ १२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान्भवति स मेधावान् भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्भिर्यजति स सर्वं लभते। स सर्वं लभते।

॥ इति त्रयोदशः खण्डः॥१३॥

